No. ६६६ · घ

Title चाणक्यराजनीतिः

Author

Extent ८ Age

Subject नीतिशास्त्रम् · सम्पूर्णम्

नं० ६६६-च

चाणक्य राजनीतिसमुच्चयसार संग्रहः

नं० ५५६-च

७ पत्र

नं० ६६६-च

चानारव्य राजनीतिः (धर्मशास्त्रान्तर्गत नीतिशास्त्रम्)

पत्राणि ७ (सम्पूर्णम्)

राज
१

ॐश्रीगणेशाय नमः॥ नानाशास्त्रोदितं वक्ष्ये राजनीतिसमुच्चयम् सर्वबीजमिदं शास्त्रं चाणाक्यं
सारसंग्रहम् १ मूलसूत्रं प्रवक्ष्यामि चाणाक्येन यथोदितं यस्य विज्ञानमात्रेण मूर्खो भवति प
ण्डितः २ दुष्टा भार्या शठं मित्रं भृत्याश्चोत्तरदायिकाः ससर्पेण गृहे वासो मृत्युरेव न संशयः ३
रूपयौवनसंपन्ना विलासकुलसंभवाः विद्याहीना न शोभंते निर्गंधा इव किंशुकाः ४ धनिकः
श्रोत्रियो राजा नदी वैद्यस्तु पंचम पंच यत्र न विद्यंते तत्र वासं न कारयेत् ५ नदीनां च नखिनां
चैव शृंगीणां शस्त्रपाणिनां विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ६ विद्वत्वं च नृपत्वं च नैव तु
ल्यं कदाचन स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ७ चिंताज्वरो मनुष्याणां वस्त्राणामातपो १

ज्वरः ८ गतिस्त्रीणांसदाभर्त्तानदीनांसागरोगतिः शत्रुभिःपीड्यमानानांनराणांनृपति
र्गतिः ९ पंडितेषुगुणाःसर्वेमूर्खेदोषाश्चकेवलः तस्मान्मूर्खसहस्रेभ्यप्राज्ञएकोविशि
ष्यते १० एकेनापिसुवृक्षेणपुष्पितेनसुगंधिषु शोभतेतद्वनंसर्वंसुपुत्रेणकुलंयथा ११
एकेनापिकुवृक्षेणकोटरस्थेनवह्निना दह्यतेतद्वनंसर्वंकुपुत्रेणकुलंयथा १२ दुरधीता
विषंविद्याप्यजीर्णेभोजनंविषम् विषंगोष्ठीदरिद्रस्यवृद्धस्यतरुणीविषम् १३ नचवि
द्यासमोबंधुर्नचव्याधिसमोरिपु नचापत्यसमःस्नेहोनचदैवात्परंबलम् १४ यस्यना
स्तिस्वयंप्रज्ञाशास्त्रंतस्यकरोतिकिं लोचनाभ्यांविहीनस्यदर्पणःकिंकरिष्यति १५ यो

राज० २
2

स्यत्नेवेत्निगुणाप्रकर्षमतस्य निंदांसततंकरोति यथाकिरातःकरिकुंभजातांमुक्तांपरित्यज्यवि
भर्त्तिगुंजाम् १६ उत्तमस्यापिवर्णोवानीचोवागृहमागतः तस्यपूजाविधातव्यासर्वत्राभ्यागः।
तोगुरुः १७ धृतकुंभसमानारीतप्तांगारसमःपुमान् तस्माद्धृतंचवह्निंचनैकत्रस्थापयेद्बुधः
१८ परोक्षेकार्यहंतारंप्रत्यक्षेप्रियवादिनम् वर्जयेत्तादृशंमित्रंविषकुंभंपयोमुखं १९ आ
दिमध्यावसानेषुनैवगच्छतिविक्रियाम् अतिस्त्वतिसत्शीलानांनृपाःकुंठेतिसंग्रहे २० वादे
नवहवोनष्टायेतेकौरवपांडवाः परमार्थपरित्यागोनत्ववादःपरैःसह २१ आपदार्थेधनं
रक्षेद्दारान्रक्षेद्धनैरपि आत्मानंसततंरक्षेद्दारैरपिधनैरपि २२ एवदातापरद्रव्यंपरिवा

दानपरस्यच परीहास्यंगुरुस्थानेचापत्यंचविवर्जयेत् २३ योध्रुवाणिपरित्यज्यअध्रुवाणि
चसेवते ध्रुवाणितस्यनश्यंतिचाध्रुवंनष्टमेवच २४ त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्य।
जेत् ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेत् २५ उत्सवेव्यसनेचैवदुर्भिक्षेशत्रुसंग्रहे रा।
जद्वारेश्मशानेचयस्तिष्ठतिसबांधवः २६ यानिपात्रेषणेभृत्यःबांधवोव्यसनागम मित्रं
चापत्तिकालेचभार्य्याचनविभक्षये २७ लब्धमर्थेनगृह्णीयात्स्तब्धमंजलिकर्मणा मूर्खंछ।
लार्थप्रत्याचयथार्थेनैवपंडित २८ आहारोद्विगुणस्त्रीणांबुद्धिस्तासांचतुर्गुणा षड्गु।
णोव्यवसायश्चकामश्चाष्टगुणोस्मृतः २९ भोज्यभोजनशक्तिश्चरतिशक्तिर्वरास्त्रियः विभ

स्य

वोदानशान्तिश्चनाल्पंतपसःफलं ३० निषादप्यमृतंग्राह्यममेध्यादपिकांचनं नीचादप्युत्तमावि

राज· द्यांस्त्रीरत्नंदुष्कुलादपि ३१ उपकारगृहीतेनशत्रुणाशत्रुमुद्धरेत् पादलग्नंकरस्थेनकंटकेनैयकंटकं

३ ३२ धनधान्यप्रयोगेषुतथाविद्यागमेषुच आहारेव्यवहारेचत्यक्तलज्जासदाभवेत् ३३ कुलशील

गुणोपेतःसत्यधर्मपरायणः प्रवीणःकुशलोदक्षोराजामात्योभिधीयते ३४ पंचयत्रनविद्यंतेन

नकुर्यात्तत्रसंस्थितिं लोकयात्राभयंलज्जादाक्षिण्यंत्यागशीलता ३५ इंगिताकारतत्त्वज्ञोबलवान्प्रि

यदर्शिनः अप्रमादीसदादक्षःप्रतिहारःसउच्यते ३६ मेधावीवाक्पटुर्दक्षोपरिचित्तोयलक्षकः

धीरोयथोक्तवादीचएषदूतोभिधीयते ३७ वेदवेदांगतत्त्वज्ञोजपहोमपरायणः आशीर्वाद

परोनित्यंएवराजपरोहितः ३८ सकृदुक्तग्रहीतार्थोलघुहस्तजितान्तरः सर्वशास्त्रसमालोकीएषवैले
खकःस्मृतः ३९ पितृमातृकुलैर्ज्ञातशास्त्रार्थीमिष्टवाचकः शुचिर्विश्वकठिनश्चैवसूपकारःसउच्यते
४० त्यजेत्स्वामिनमत्युग्रमत्युग्रंकृपिणंत्यजेत् कृपणादपिशोषज्ञंतस्माच्चकृतनाशकम् ४१ स्व
लसंस्थावरंत्युग्रंसत्त्वव्यसनिनंसठम् असंतुष्टमभक्तंचत्यजेद्भृत्यंनराधिपः ४२ ऋणशेषोव्याधिशे
षश्चशत्रुशेषस्तथैवच पुनःपुनःप्रवर्द्धन्ते तस्माच्छेषमशेषयेत् ४३ कोतिभारःसमर्थानांकिंदूरंव्य
वसायिनां कोविदेशःसविद्यानांकःपरःप्रियवादिनां नविश्वसेदविश्वस्तविश्वस्तंनविकल्पयेत्
विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृन्तति ४५ शैलेशैलेनमाणिक्यंमौक्तिकंनगजेगजे साधवो

रा·नी·
४

नहिसर्वत्रचंदनंनवनेवने ४६ यदिच्छेच्छाश्वतिंप्रीतिंत्रीणितत्रनकारयेत् द्यूतमर्थप्रयोगंचपरोक्षेदारद
र्शनम् ४७ अशोच्योनिर्धनाविद्वानशोच्यपुत्रपंडितः अशोच्याविधवानारीपुत्रपौत्रप्रतिष्ठिता ४८ अहि
विडालोन्नाभ्रातारंडिकाचसपुत्रणी आत्मभावंनकुर्वंतिभागिनेयस्तुपंचमः ४९ कलत्रंदृष्टतक्रात्वा।
रामनेयःपरस्त्रियम् अधर्मश्चापपदस्तसद्यःफलतिनित्यशः ५० किंकरिष्यतिसंसर्गःस्वभावोदुरति
क्रमः यस्यामफलमध्यस्यःकषायोत्तांग्रतांगतः ५१ सिंहदेकंबकादेकंचत्वारिकुक्कुटादपि वायसा
त्पंचशिक्षेत्षट्शुनास्त्रीणिगर्धभात् ५२ कृतोव्यवसापिमनंमित्रोकृतोःशीनिद्ररात्मनां कृतःसौ
ख्यंदरिद्राणांदुष्टानांचकृतःधृतिः ५३ प्रभूतंकार्यमल्पंवायोनरःकर्तुमिच्छति पराक्रमेणतत्कु

र्थ्यान्तसिंहादेकं शिक्षीयते ५४ इन्द्रियाणि तु संयम्य बकवत्पंडितो नरः कालं देशोपपन्नानि सर्वकार्याणि

साधयेत् ५५ प्रागुत्थानं च युद्धं च संविभागं च बंधुषु स्त्रियमाक्रम्य भुंजीत शिक्षेच्चत्वारि कुक्कुटात् ५६

गूढमैथुनधार्ष्ट्यं च काले चालयसंग्रहं अप्रमत्तमनालस्यं पंच शिक्षेच्च वायसात् ५७ बह्वाशी स्वल्पसं

तुष्टः सुनिद्रः शीघ्रचेतनः स्वामिभक्तश्च शूरश्च षडेते श्वानतो गुणाः स्मृता ५८ अविश्रांतं वहेद्भारं शीतोष्णं न च

विंदति संतोषी तथा भवेन्नित्यं त्रीणि शिक्षेच्च गर्दभात् ५९ तस्करस्य कुतो धर्मो दुर्जनस्य कुतः क्षमा

वेश्यानां च कुतः स्नेहः कुतः सत्यं च कामिनां ६० कीदृशी सुभगा विद्या याति दृष्ट्वा निर्मला नदी कीदृशी

प्रमदा निंदा याति दृष्ट्वा चपला पगा ६१ विद्यते स्त्रीषु चापल्यं विद्यते ब्राह्मण तपः पौरुष्यं वर्तते नी

रा॰नी॰
९
5

चेदमासाधुजवर्त्तते ६२ सर्प्पः क्रूरः खलः क्रूरः सर्प्पात्क्रूरतरः खलः मंत्रौषधिवशः सर्प्पः खलः केनोपशा
म्यति ६३ अरिमित्रमुदासीनंमध्यस्थंसमविग्रहम् योनबुध्यतिमंदात्मासकिंपश्यतिदुर्म्मतिः ६४ अव
श्यपूज्यतामस्यनश्वरीरंधारीतियां सत्तामपिदर्शणप्रापनानयंतेहिपराभयम् ६५ असत्वंकृपाकेनि
त्यंसत्वंनित्यामरोगिता भार्य्याभर्तुःसत्वंनित्यंतस्यनित्योत्सवोगृहे ६६ स्वहस्तलिखितंस्तोत्रंस्वयं
घृष्टंचचंदनं स्वयंचग्रथितंमाल्यंशक्रादपिहरेत्श्रियं ६७ नहिस्यानंहियत्स्त्रीयंयतोभोगततोम
त्वं यतःसाधुस्ततोजीव्यंयतोभार्यातततःस्थितिः ६८ मातृवत्परदारेषुपरद्रव्येषुलोष्टवत् आ
त्मवत्सर्वभूतेषुयपश्यतिसपंडितः ६९ गोजीर्णवस्त्रजीर्णंचभिन्नंपुरुषयःस्त्रियः दुर्ज्जनंचशाठं।

सिंहरवः परिवर्जयेत् ७० यस्यमातागृहेनास्तिभार्याचाप्रियवादिनी अरण्यंतेनगंतव्यंयथार।
ण्यंतथागृहम् ७१ यस्यभार्यागृहेनित्यंशानीवप्रनिगर्जति सोदन्तितस्यगात्राणिपद्यानीवह्निमंग
मे ७२ दारिद्रेणाभिभूतस्यपंचनश्यन्तिदेहिनः लज्जाशौचंतथाचारःसत्यंधर्मस्तुपंचमः ७३ क्षी
णमन्त्रप्रसंसीयातभार्यांचगतयौवनम् रणात्प्रत्यागतश्शूरःशस्यंचगृहमागतम् ७४ पुस्तक
स्थाचयाविद्यापरहस्तगतंधनम् कार्यकालेसमुत्पन्नेनसाविद्यानतद्धनम् ७५ सद्योमांसंनवा
न्नंचबालास्त्रीक्षीरभोजनं घृतमुष्णोदकंचैवसद्यःप्राणकराणिषट् शुष्कमांसंस्त्रियोवृद्धाबाला
र्कस्तरुणंदधि प्रभातेमैथुनंनिद्रासद्यःप्राणहराणिषट् ७६ हस्तीहस्तसहस्रेणशतहस्तेनवा

रा॰नी जिनः शृंगिणां दशहस्तेन स्थानत्यागेन दुर्जनः ७८ सेवितव्यो महावृक्षः फलछायासमान्वि
६ तः यदिदैवात्फलंनास्तिछायाकेननिवार्य्यते ७९ चद्भषापिनपश्यंतियदाभवतिनिष्फ
6 लं सफलः सेव्यतेवृक्षः पक्षिभिर्वानरैर्नरैः ८० पुंसः स्वकीयगुणकीर्त्तनयेवयोग्यास्तत्रन्म
मूमिक ········ व्यथैव कःकालकूटमभिवंदतिसागरोस्यम् ८१ आचारःकुलमाख्यातिकु
लमाख्यातिभाषणं संभ्रमःस्नेहमाख्यातिवपुराख्यातिभाजनं व्यर्थमुत्तमशीलस्य(
बलंकापुरुषस्यच उद्यानंचाल्पभाग्यस्यधनंकृपणजीविनां ८३ दूरतःशोभतेमू
र्खोलंबमानपटीव्रतः तावच्चशोभतेमूर्खोयावत्किंचिन्नभाषते ८४ वरमेकोगुणीपु

ञोमचर्म्मोर्व्विशतैरपि एकस्तुंडस्तमोहंति नचताराशतैरपि ८५ कोकिलानांस्वरोरूपंनारीरू
पंपतिव्रता विद्यारूपंकुरूपाणांक्षमारूपंतपस्विनां ८६ दिव्यंचूतरसंपीत्वानगर्व्वयातिको
किलः पीत्वाकर्दमपानीयंभेकोपिममकायते ८७ महाकुलप्रसूतोपिगुणवान्पूज्यतेनरः
धनिवंशविशुद्धश्चःनिर्गुणःकिंकरिष्यति ८८ असंभाव्यंनवक्तव्यंप्रत्यक्षेदृश्यतेयदि शि
लातरतिपानीयंगीतंगायतिवानरः ८९ असंतुष्टाद्विजानष्टासंतुष्टाइवपार्थिवः सल
ज्जागनिकानष्टानिर्ल्लज्जाचकुलांगना ९० इतिश्रीसंक्षेपनीतिप्रकाशंसमाप्तम् ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥